दिनाङ्क:-18.12.2025

प्रात: - 06:55

## प्रधानमन्त्री ओमान यात्रा

प्रधानमन्त्री नरेन्द्र मोदी राष्ट्रत्रयाणां स्वीययात्रायाः अंतिमे चरणे गतदिने सायंकाले ओमान-देशस्य द्विदिवसीययात्रायां मस्कट-नगरं प्राप्तवान्। जॉर्डन-इथियोपिया-देशयोः सफलयात्रायानन्तरं श्रीमोदी ओमान-देशं प्राप्तवान्। मस्कट्-वायुपत्तन-स्थले ओमान्-देशस्य रक्षाप्रकरणानां उपप्रधानमन्त्री सैयद-शिहाब-बिन-तारिक-अल-सईद-इत्यसौ श्रीमोदिनः स्वागतं कृतवान्। उभौ विभिन्न-क्षेत्रेषु भारत-ओमान-देशयोः मध्ये परस्परं सहयोगं सुदृढ़ीकर्तुं, अथ रणनीतिक-सहभागित्वं वर्धयितुं चर्चितवन्तौ। प्रधानमन्त्री मोदी ओमान्-राष्ट्रस्य राष्ट्रप्रमुखस्य सुल्तान्-हैथम्-बिन्-तारिक्-इत्यस्य निमन्त्रणे मित्रराष्ट्रस्य यात्रायां वर्तते। अद्य ऐतिहासिक-क्षणावसररूपे भारत-ओमान्-देशयोः मध्ये व्यापक-आर्थिक-सहभागित्व-अनुबन्धपत्रे हस्ताक्षराणि भविष्यन्ति। संचार तन्त्रपटले श्रीमोदी उल्लिखितवान् यत् ओमान्-देशः भारतेन सह सुदृढ़-मित्रतायाः सुदृढ-ऐतिहासिक सम्बन्धानां च भूमिः वर्तते।

## लोकसभा-शिवराज सिंह चौहान

केन्द्रीयः ग्रामीण-विकास-कृषि-कृषक-कल्याणमन्त्री शिवराजसिंह चौहानः अद्य लोकसभायां विकसित भारतम्-वृत्यवसर आजीविका अभियानम् अथ विकसित-भारतम्-ग्रामकल्याण विधेयकं विंशतिः पञ्चविंशतिः इत्येतदधिकृत्य प्रचाल्यमानायाः चर्चायाः उत्तरं दास्यति। गतदिने लोकसभायां विकसित भारतम् ग्रामकल्याण-विधेयकं विंशतिः पञ्चविंशतिः अधिकृत्य चर्चापूरणाय विस्तृत्म् उपवेशनं प्रचालितम्। एतस्य विधेयकस्य उद्देश्यं विकसित भारतम्-ग्राम कल्याण विधेयकस्य राष्ट्रयदृष्टिकोणानुरूपे ग्रामीण-विकास-मूलाधार-संरचनायाः स्थापनं वर्तते। विधेयकविषये श्रीचौहानः प्रोक्तवान् यत् एतेन विधेयकेन ग्रामविकासाः सुनिश्चिताः भवेयुः। श्रीचौहानः प्रोक्तवान यत् विधेयके वृत्यवसर-प्रतिभूतिः पञ्चविंशत्युत्तरशतं दिनं यावत् करणस्य प्रस्तावः। एतेन महात्मगांधिनः आत्मनिर्भर-विकसित-निर्धन-मुक्तभारतस्य दृष्टिकोणं साकाररूपं ग्रहीष्यति।

## आयुष-सचिव

आयुष-सचिवः वैद्य-राजेश-कोटेचाः इत्यसौ प्रोक्तवान् यत् विश्व-स्वास्थ्य-सङ्घटनस्य शताधिकानां सङ्स्यदेशानां प्रायशः पञ्चविंशतिःसङ्ख्याकाः स्वास्थ्यमन्त्रिणः पारम्परिक-चिकित्साविषये समायोज्यमाने द्वितीय-वार्षिक-शिखर-सम्मेलने भागं भजन्तः सन्ति। असौ प्रोक्तवान यत् प्रधानमन्त्री नरेन्द्रमोदी शिखर-सम्मेलनस्य समापन-सत्रे भागं ग्रहीष्यति। श्री कोटेचाः प्रोक्तवान् यत् पारम्परिक-चिकित्सा-क्षेत्रे भारतेन क्षमतानिर्माण-शिक्षा-अनुसन्धान-क्षेत्रे स्वीयविशेषज्ञता प्रदत्ता।

## क्रिकेट्

भारत-दक्षिण अफ्रीका-देशयोः मध्ये अनुर्वतमानायाः पञ्चस्पर्धात्मिकायाः विंशतिः प्रतिविंशति-क्रिकेट्-स्पर्धामालिकायाः द्वितीया स्पर्धा स्थगिता। लखनऊ-नगरस्य इकाना-क्रीडांगणे अत्यधिक-न्यूनदृश्यता-कारणेन निर्णायक-मण्डलेन एषः निर्णयः श्रावितः। वारं-2 निर्णायकमण्डलेन क्रीडास्थलं निरीक्षितम् परं परिस्थितिः प्रतिकूला एव। एतद् –परिणामस्वरूपे भारतस्य द्वि-एकम् इत्येतद् श्रृंखला वर्धनं प्रवर्तत एव। पञ्चमी अन्तिमा च स्पर्धा एकोनविंशतिः-दिनांके अहमदाबादस्य नरेन्द्रमोदी-क्रीडांगणे स्पर्धिष्यते।